आकाशवाणी
संस्कृत-वार्ता:

दिनाङ्कः 04/12/2025 सायम् - 06:20

मुख्यवार्ता:

- रशिया-देशस्य राष्ट्रपतिः व्लादिमिर् पुतिनः भारत-रशिया वार्षिक-शिखरसम्मेलने भागं ग्रहीतुं द्विदिवसीय-यात्रायाम् नवदेहली-नगरं कश्चित्कालानन्तरमेव आगमिष्यति।

- रक्षामंत्री राजनाथसिंहः रशियादेशस्य रक्षामंत्री च नवदेहली-नगरे सैन्य-सामरिक-तान्त्रिक-सहकारविषये भारत-रशिया-अन्तः-सर्वकारीय-आयोगस्य सह-अध्यक्षतां कुरुतः।

- राज्यसभायां केन्द्रीयोत्पादशुल्क इत्यस्य संशोधित- विधेयकं 2025 इति स्वीकृतम्, यस्योद्देश्यं सिगरेट, सिगार इत्यादिषु तमालोत्पादेषु उच्च-उत्पादशुल्कस्य अनुमतिः अस्तीति।

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत्, वन्यजीवानां रक्षणं, प्रकृत्या सह सामञ्जस्यपूर्णं जीवनं च भारतस्य सभ्यताविषयकमूल्यानाम् अभिन्नमङ्गभूतमस्तीति।

- फिच् रेटिङ्ग्स् इति संस्थया साम्प्रतिके वित्तवर्षे भारतस्य GDP इत्यस्य वृद्धिः भविष्यतीति पूर्वानुमानं कृतमस्ति।

रुस-राष्ट्रपतेः भारत यात्रा

रशिया-देशस्य राष्ट्रपतिः व्लादिमिर् पुतिन् त्रयोविंशतितमे भारत-रशिया वार्षिकसम्मेलने भागं ग्रहीतुं अद्य नवदेहलीं कश्चित्कालानन्तरमेव सम्प्राप्स्यति। द्विदिवसीययात्रायां राष्ट्रपतिः पुतिनः श्वः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं करिष्यति। उभौ नेतारौ परस्पर-हितस्य, क्षेत्रीय-वैश्विक-विषयेषु च विचार-विनिमयं करिष्यतः। व्यापारस्य, अर्थव्यवस्थायाः, स्वास्थ्यसेवायाः, शिक्षायाः, संस्कृतेः, प्रसारमाध्यमानाञ्च अनेकानि सन्धिपत्राणि हस्ताक्षरितानि भविष्यन्तीति अपेक्षते/ राष्ट्रपतिः द्रौपदी मुर्मुः अतिथेः सम्मानार्थं भोजस्य आयोजनं करिष्यति।

भारत-रूस रक्षा

रक्षामन्त्री राजनाथसिंहः रूसरक्षामन्त्री च आन्द्रेबिलोसव इत्येतौ नवदिल्याः राष्ट्रिय-युद्धस्मारके पुष्पमालां अर्पितवन्तौ। अतिथेः स्वागतं रक्षाराज्यमन्त्रिणा संजयसेठ इत्यनेन विमानस्थानकं गत्वा कृतम्। रक्षामंत्री राजनाथसिंहः रशियादेशस्य रक्षामंत्री च नवदेहली-नगरे सैन्य-सामरिक-तान्त्रिक-सहकारविषये भारत-रशिया-अन्तः-सर्वकारीय-आयोगस्य सह-अध्यक्षतां कुरुतः। एतन्मध्येरूसदेशस्य रक्षामन्त्रिणा आन्द्रे बिलोसोव इत्यनेन उक्तं यत् रूसभारतयोस्सम्बन्धः समयातीतः मित्रताधारितोऽस्तीति।

आरएस-केन्द्रीय-उत्पाद शुल्कः

राज्यसभया परिष्कृत-केन्द्रियोत्पाद-विधेयकं विंशतिः पञ्चविंशतिः इति स्वीकृतम्। राज्यसभायां केन्द्रीयोत्पादशुल्क इत्यस्य संशोधित- विधेयकं 2025 स्वीकृतम्, यस्योद्देश्यं सिगरेट, सिगार इत्यादिषु तमालोत्पादेषु उच्च-उत्पादशुल्कस्य अनुमतिः अस्तीति।

पी. एम.-अन्ताराष्ट्रिय चित्रक- दिवसः/ लेखः

प्रधानमन्त्री नरेन्द्रमोदी अद्य पर्यावरण-मन्त्रिणा भूपेन्द्र-यादवेन भारतस्थानां चित्रकाणां विषये लिखितस्य लेखस्य प्रसारणं एकस्मिन् सामाजिक-प्रसार-माध्यमे कुर्वन् अलिखत् यत् देशे चित्रकाणां वर्धमाना सङ्ख्या अत्यन्तं प्रोत्साहकरा अस्तीति। प्रधानमन्त्री इत्यपि अवदत् यत्, भारतस्थैः चित्रकैः पञ्चशावकाः सन्ति

जनिताः। प्रधानमन्त्रिणा स्पष्टीकृतं यत् भारतीय-पर्यावरणं बहिरागतेभ्यः चित्रकेभ्योऽपि पूर्णतया अनुकूलं वर्तते इति। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अन्ताराष्ट्रिय-चित्रक-दिवसावसरे तेषां संरक्षणार्थं समर्पितेभ्यः सर्वेभ्यः वन्यजीवप्रेमिभ्यः संरक्षणवादिभ्यश्च शुभाशयाः सन्ति प्रेषिताः।

## बालविवाहमुक्तभारतम्

केन्द्रीय-महिला-बाल-विकास-मन्त्री अन्नपूर्णा देवी अद्य नवदेहल्यां बालविवाहमुक्तभारताय शत-दिवसीय-सघन-जागृति-अभियानस्य आरम्भम् अकरोत्। अस्मिन् अवसरे महिला-विकास-राज्यमन्त्री सावित्री ठाकुरः अपि उपस्थिता आसीत्। बालविवाहस्य समाप्त्यर्थं राष्ट्रस्य प्रतिबद्धतां पुनः दृढीकृत्य, केन्द्रीयमन्त्री प्रतिभागिभ्यः राष्ट्रियप्रतिज्ञां प्राददात्। शत-दिवसीयस्य अभियानस्य भागरूपेण, विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु, पञ्चायतादिषु च संरचित-जागृति-कार्यक्रमाणां शृङ्खला आयोजिता भविष्यति। अस्मिन् अभियाने जागरूकता-सभाः, वीथि-नाटिकाः, भित्तिचित्राणि, भित्तिपत्र-स्पर्धाः, वादविवादस्पर्धाः, बाल-विवाह-मुक्त-भारत-प्रतिज्ञा-समारोहाश्च आयोजयिष्यन्ते, येषाम् उद्देश्यमस्ति यत् समुदायाः जागरुकाः भवेयुः बालविवाहं विरुध्य च राष्ट्रिय-आन्दोलनं सुदृढं कुर्वन्त्विती ।

## आरएस-यातायात

विदेश-कार्यमन्त्री डा. एस्. जयशङ्करः राज्यसभां सूचितवान् यत् राष्ट्रिय-अन्वेषण-संस्था, एन्.आई. ए. इत्यनेन सप्तविंशतिः मानव-तस्करस्य प्रकरणानि पञ्जीकृतानि, अन्विष्टानि च, फलतः एकोनसप्तत्यधिकैकशत जनाः निगडिताः, द्वात्रिंशदधिकैकशत-जनाश्च विरुध्य आरोपपत्रं प्रस्तुतम्। सभायां अनुपूरक-प्रश्नस्योत्तरे डा. जयशङ्करः अवदत् यत् एतदतिरिच्य एन्. आई. ए. इत्यनेन अगस्त-मासे हरियाणा-पञ्जाब-प्रदेशयोः द्वौ प्रमुखौ व्यापारिणौ अक्तूबर-मासे च हिमाचलप्रदेशतः द्वावपि जनौ निगडितौ इति।

## राष्ट्रपतिः पी. एम्. नौसेना दिवसः

राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च नौसेना-दिवसस्य अवसरे सर्वेभ्यः भारतीय-नौसेना-कर्मिभ्यः, पूर्वसैनिकेभ्यः, तेषां परिवारेभ्यश्च शुभाशयाः प्रेषितवन्तः। सामाजिक-प्रसार-माध्यमे राष्ट्रपतिः मुर्मुः अवधानं दत्तवती यत् व्यापारमार्गाणां सुरक्षातः आरभ्य सागरीय-अर्थव्यवस्थायाः सुदृढीकरणपर्यन्तं भारतीय-नौसेना अनुशासनं, अनुकम्पा, दायित्वञ्च अङ्गीकरोतीति।

## जी. डी. पी. इत्यस्य वृद्धिः

फिच् रेटिङ्ग्स् इति संस्थया अस्मै वित्तवर्षाय भारतस्य जी. डी. पी. इत्यस्य वृद्धेः पूर्वानुमानं पूर्वतनस्य दशमलवनवोत्तर षड् इति प्रतिशतात् दशमलवचतुरधिक-सप्त- प्रतिशतं यावत् परिवर्त्य, सुदृढं भविष्यति। अस्मै परिष्काराय वर्तमानकालस्य करपरिष्कारैः सह सकारात्मक- अर्थव्यवस्थायाश्च प्रभावः कारणमस्तीति उल्लिखितम्।

## स्वराजकौशलः

पूर्वतनः मिजोरम-राज्यस्य राज्यपालः श्रीस्वराज-कौशलः पञ्चत्वमुपगतः। शोकाकुलया पुत्र्या, भाजपेति दलस्य सांसदेन बांसुरी-स्वराज इत्यनया शोकाकुलेयं सूचना दत्ता। श्रीस्वराजः प्राक्तन-विदेशमन्त्रिणः सुषमास्वराज इत्यस्याः पतिः आसीत्।

।। इति वार्ताः ।।